श्री स्वामिनारायणो विजयतेतराम् ॥

Chapter-4

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## चतुर्थोऽध्यायः

( माया-प्रकृतिनिरूपणात्मकः )

## श्रीस्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## चतुर्थोऽध्यायः

### ४.१ मायाप्रकृतितत्त्वनिरूपणम्

श्रीस्वामिनारायणसम्प्रदायाभिमतेषु तत्त्वेषु माया तत्त्वमन्यतममास्ते । **'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्** [१]''। इति श्रुत्यनुसारेण मायाया अपरं नाम प्रकृतिरिति । '**माया वयुनं ज्ञानमि** [२]ति कोशवाक्यानुसारेण माया शब्दः ज्ञानस्यापि वाचको भवति। प्रकरोति विविधविकारजातमस्यां परमात्मेति प्रकृतिः । श्रुतिरप्यभिधत्ते ''**अस्मान्मायी सृजते विश्वमेतत्** [३]''। इमं प्रधानशब्दवाच्यमेवाश्रित्य परमात्माऽस्य सम्पूर्णस्य जगतः सृष्टिं करोतीत्यर्थः । सेयं प्रकृतिः सततं परिणामशीलेत्यभिधत्ते ''**विकारजननीमज्ञामष्टरूपामजां ध्रुवाम्** [४]'' इति श्रुतिरपि । अनया श्रुत्या प्रकृतिरियं विकाराणां जननीत्वेन, अजात्वेन, ध्रुवत्वेन च स्पष्टरूपेणाभिधीयते । प्रकृतेरस्याः निरन्तरं परिणामो भवति महदादिरूपेण; अत एवेयं विकारजननीत्यभिधीयते श्रुत्या । अस्याः कदाचिदपि आत्यन्तिको विनाशो नहि भवति अत एवेमां श्रुतिं ध्रुवामित्यभिधत्ते। प्रकृतिरियं प्रलयकालेऽपि सूक्ष्मरूपेणावस्थिता भवति; अत एवेयमजाशब्देन अभिहिता भवति। श्रीमद्भगवद्गीतायां भगवानप्याह

**'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि** [५]''।

इति वाक्येन प्रकृतेरनादित्वं भवति प्रतिपादितम्।

जीवेश्वरमायाब्रह्म-परब्रह्मेति तत्त्वपञ्चकविवृण्वद्भिः तैः दर्शनधुरन्धरैः जीवेश्वराभ्यां परस्याः मायायाः द्वैविध्यं प्रतिपादितं भवति। (१) मूलप्रकृतिरूपा माया (२) प्रधानप्रकृतरूपा मायेति ।

महासृष्टे सर्जनसमयेऽनन्तकोटिब्रह्माण्डनामुपादानकारणत्वेन जगतो मूलत्वान्मूल प्रकृतिरिति सुवचम्। यथा मूलप्रकृतेरुपादानत्वमनन्तकोटिब्रह्माण्डोद्भवे तथैवैकब्रह्माण्डोत्पत्तौ प्रधानप्रकृतिरूपायाः मायाया उपादानत्वं स्वीक्रियते दर्शनेऽस्मिन्। कार्येण महत्त्वात् मूलप्रकृतिरेव महामायेत्यपि शब्द्यते।

सेयं प्रकृतिः परमात्मनाऽधिष्ठिता सति तस्यैव श्रीहरेः सत्यसंकल्पेन प्रेरिता सति विविधान् विकारान् जनयति। तथाहि-

**सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।**
**कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्** [६]।।

---

१- श्वेताश्वतरोपनिषत् ४/१०
२-निघण्टु
३-श्वेताश्वरोपनिषत् ४/९
४-मान्त्रिकोपनिषत् ३
५-भगवद्गीता १३/१९
५-भगवद्गीता ९ /७

**प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।**
**भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ।।**
**मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।**
**हेतुनाऽनेन कौन्तेय जगद्विपरिवर्तते [१]।।**

इति गीतायां भगवान् स्वयमेवाह। प्रकृतेः स्वरूपं निरूपयन् श्रीकृष्णवल्लभाचार्यः श्रीस्वामिनारायण वेदान्तसारनाम्नि ग्रन्थे लिखति–

**'तत्र सत्त्वरजस्तमोगुणवती प्रकृतिः । गुणसाम्यं तल्लक्षणम् । साम्यं नाम अवैषम्यम् ।** (त्रयाणामपि गुणानां समान मात्रायां विद्यमानतेत्यर्थः) **सा अविद्या-माया-तमोऽव्यक्तादि शब्दवाच्यास्ति । माया शब्दार्थो विस्मयनीयः, न तु मिथ्यारूपः प्रकृते र्विचित्रार्थविस्मयनीयत्वात् 'माया' शब्देन निर्देशोऽपि भवति** [२]। अनेनानुच्छेदेनायमाचार्यः मायायाः मिथ्यात्वरुपमर्थं स्वीकुर्वतामद्वैतिनां मतं तिरस्कृत्य लोकसिद्धान्तमाह।

अग्रेऽयमाचार्यवर्यो लिखति **'सा च ज्ञानमिवाज्ञानात्मिका प्रकृतिर्भावरूपा । अज्ञानं तु द्वेधा विपरीतज्ञानमन्यथा ज्ञानं च** [३]।' अनेनैव प्रकारेण तत्त्वप्रभावली नामके स्वकीये ग्रन्थे मायायाः विविध दर्शनाभिमत नामोल्लेखं कुर्वन्तः श्रीकृष्णवल्लभाचार्याः लिखन्ति यत्

अथ माया, त्रिगुणा, सत्त्वमात्रं वा, रजोमात्रं वा, तमोमात्रं वा, अज्ञानं वा, अविद्या वा, अन्धकारो वा, ब्रह्मछाया वा, अप्रकाशो वा,धूम्रघनता वा, जडशक्तिर्वा, ब्रह्मोत्थस्फुरणा वा, ब्रह्मनिद्रा वा, ब्रह्मणः कर्तृत्ववृत्तिस्वप्नं वा, महत्तत्त्वाधिष्ठात्री वा, महत्तत्त्वादिप्राणनशक्तिर्वा, ब्रह्मप्रेरणाशक्तिर्वा, प्रकृतिर्वा, स्वभावो वा, आपूरकतत्त्वं वा, दृश्यं वा, भोग्यं वा, चेतनाऽऽधानं वेति । महलक्ष्मी, महाशिवा, महेश्वरी, वामतत्त्वं वा,शीतलक्षेत्रं वा, प्रभा वा, सृष्टिर्वा, पार्वती ब्रह्माणी वा [४]''।

तत्र तत्र दर्शनेषु तत्तद्दर्शनदक्षैः विद्वद्भिः ताभिस्ताभिः संज्ञाभिः मायायाः वर्णनं क्रियते स्वस्वमतानुसारेण।

पुराणी श्रीघनश्यामचरणदासेन निम्नलिखितं मायायाः लक्षणमुक्तम् । तद्यथा–

**मायायाः लक्षणं तत्र कालेन परिणामिता ।**
**त्रिगुणत्वं सकार्यायां भोक्तृभोगार्हता तथा [५]।।**

श्रीमल्लोकाचार्यस्तु तत्त्वत्रयनामके ग्रन्थे लिखति यत्–अचित् तत्त्वस्य त्रयो भेदाः सन्ति। शुद्धसत्त्वम्, मिश्रसत्त्वम् सत्त्वशून्यञ्च। तत्र मिश्रसत्त्वस्यैवापरं

---

१-भगवद्गीता ९/८-९
२-स्वा. वेदान्तसारः पृ-२
३-स्वा. वेदान्तसारः पृ. २
४-तत्वप्रभावलिः पृ. ११-१७
५-आध्यात्मिकतत्त्वख्यानम् श्लोक-७४

नाम प्रकृतिर्वर्तते। तथाहि मिश्रसत्त्वं नाम सत्त्वरजस्तमोरूपत्रययुक्तः बद्धचेतनानां ज्ञानानन्दयोस्तिरोधायकः विपरीत ज्ञानजनकः नित्य ईश्वरस्य क्रीडापरिकरभूतः प्रदेशभेदेन कालभेदेन च सदृशानां विसदृशानां विकाराणामुत्पादकः प्रकृतिरविद्या मायेत्यभिधीयमानः कश्चिदचिद् विशेषः[१]"। इति

अयमाशयो यत्- विशिष्टाद्वैतिनामभिमतेषु त्रिषु तत्त्वेषु चिदचिदीश्वरेषु अचितो द्वितीयो भेदोऽस्तु मिश्रसत्त्वम् । तदेव माया-अविद्या-प्रकृतिः-प्रधानेत्यादिनामभिरभिधीयते । विष्णुपुराणकारेणाप्यभिहितम्-

**'तदिदं यद् जगद्योनिरनादिप्रभवाप्ययम्[२]'** ।

इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थारूपा भवति । अनयैव बद्धानां चेतनानां ज्ञानानन्दौ स्वाभाविकौ तिरोधीयेते । इयं विपरीतं ज्ञानं बद्धेषु चेतनेषु जनयति । सेयं नित्या वर्तते । आगमप्रकरणेऽप्युक्तं-

**"अनादिमाययासुप्तो यदा जीवः[३]"**।

इमां प्रकृतिमेवाश्रित्य ईश्वर अस्यां लीलाविभूतौ दीव्यति क्रीडति बहुविधम्। अत एवास्या ईश्वरस्य क्रीडापरिकररूपता सिद्ध्यति। प्रलयकाले अस्यां सदृशाः विकारा जायन्ते सृष्टिकाले समागते च विसदृशाः विकारा अस्यां महदादिकाः जायन्ते ।

प्रकृतेर्नाम्नामन्वर्थसंज्ञतां प्रतिपादयता लोकाचार्येणाभिहितं "**विकाराणां जनकत्वात् प्रकृतिरित्यभिधीयते, ज्ञानविरोधित्वादविद्येति निगद्यते, विचित्र सृष्टिकारकत्वान्मायेत्युच्यते[४]**"। सांख्यकारिकाकारेण ईश्वरकृष्णेनाप्यभिहितम् '**मूलप्रकृतिरविकृतिः[५]**'। इति। अत्र प्रकृतिशब्द उपादानकारणपरः। अयमाशयो यत् परमात्माऽधिष्ठिता प्रकृतिरेव जगत उपादानकारणं भवति । '**प्रकृतिश्च प्रतिज्ञादृष्टान्ताऽनुपरोधात्[६]**'। इति सूत्रे उपादानकारणस्यैवार्थे प्रकृतिशब्दस्य प्रयोगं करोति महर्षिर्बादरायणः । अत एव मायायाः प्रकृतिरित्यन्वर्थसंज्ञा ।

'अविद्या' पदे विरुद्धार्थक एव वर्तते नञ्समासः इतीममर्थमाह श्रीमल्लोकाचार्य उपर्युक्तायां चूर्णिकायाम् ।

विष्णुपुराणेऽप्यभिहितम्

**श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन ।**
**अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः[७]**'।

---

१-तत्त्वत्रयम् अचितप्रकरणम् पृ. १४७/१४८
२-विष्णुपुराणम् १/२/२१
३-आगम प्रकरणम् पृ. ३ काञ्चीवरप्रकाशनम्
४-तत्त्वत्रयम् अचितप्रकरणम् पृ. १०
५-सांख्यकारिका ३
६-ब्रह्मसूत्रम् १/४/२३
७-विष्णुपुराणम् ६/१७/१०-११

यथाश्चर्यकराण्यसुरराक्षसास्त्राणि मायात्वेनाभिधीयन्ते तथैवास्याः (प्रकृतेः) विचित्रसृष्टिकरत्वमभिव्यनक्ति मायाशब्दः । परस्पर विलक्षणविस्मयनीयकार्य करत्वमेव विचित्रसृष्टिकरत्वं मायायाः ।

श्रीमद्रामानुजाचार्येणाप्यभिहितं शरणागतिगद्ये–

**भगवत्स्वरूपतिरोधानकरीं स्वविषयायाश्च भोग्यताबुद्धेर्जननीं,**
**देहेन्द्रियत्वेन भोग्यत्वेन, सूक्ष्मरूपेण चावस्थितां मायाम्** [१]''।

महर्षिः पराशरोऽपि माया शब्दस्य प्रयोगं विचित्रसर्गकरत्वरूपेऽर्थे निम्नांकिते श्लोकेऽकार्षीत्–

**मेघोदयः सागरसन्निवृत्तिरिन्दोर्विभागः स्फुरितानि वायोः ।**
**विद्युद्विभङ्गो गतमुष्णरश्मेर्विष्णोर्विचित्राः प्रभवन्ति मायाः** [२]''।

माया शब्दस्य प्रकृति प्राकृत साधारणमपि भवितुमर्हति प्रयोगः तस्याः सत्त्वरजस्तमोगुणमयत्त्वात् । मायायां विद्यमाना इमे सर्वे गुणाः परस्परं मिश्रितस्वरूपाः भवन्ति । नित्यविभूतौ तु शुद्धमेव सत्त्वं भवति तत्र रजस्तमसोर्लेशोऽपि नहि भवतीति नहि तत्र मायात्वस्यातिव्याप्तिशङ्का । भगवता श्रीहरिणाऽप्यभिहितं शिक्षापत्र्यां ,

**''त्रिगुणात्मा तमः कृष्णशक्तिर्देहतदीययोः।''**
**जीवस्य चाहं ममता हेतुर्मायाऽवगम्यताम्**[३]''।

इत्थं प्रकृतेस्तानि तानि नामानि सार्थकान्येव सन्तीति महर्षिणामभिप्रायः। मायायाः स्वरूपादीनां वर्णनं कुर्वता आध्यात्मिकतत्त्वाख्यानग्रन्थकारेणोक्तं यत्तत् सर्वशास्त्रसाररूपमिति मत्वा अत्रोल्लिख्यते

**माया जीवेश्वरश्चाक्षरं ब्रह्म परं तथा ।**
**पञ्चैते कथिताः सत्याः भेदा अध्यात्मशास्त्रके ॥**
**मायाशब्दो न मिथ्यार्थं वक्ति साक्षात्तपोधनाः ! ।**
**विचित्रार्थक्रियाकारी मायाशब्दार्थ इष्यते ॥**
**आसुरास्त्रादिके सत्ये विचित्रार्थक्रियाकरे ।**
**मायाशब्दः प्रयुक्तस्तु पुराणे तत्र तत्र वै ॥**
**स्वप्नार्थस्यापि मायात्वमद्भुतत्वान्निगद्यते ।**
**यदन्ये नाधिगच्छन्ति पार्श्वस्था अपि तं पुनः ॥**
**सूक्ष्मकर्मफलं तत्तत् स्वप्ने राज्यादि तत्क्षणम् ।**

---

१-शरणागतिगद्यम् पृ. १
२-विष्णुपुराणम् १/५/३५
३-शिक्षापत्री श्लोक १०६

जीवेभ्यः प्रददातीशः श्रीहरिः सत्यमेव तु ॥
न चापि मिथ्यासर्पादिर्मायेति व्यपदिश्यते ।
मायेति व्यपदिष्टं च सद्वस्त्वद्भुतदर्शनम् ॥
प्रकृतिस्त्रिगुणा चेयं स्थूलसूक्ष्मस्वरूपिणी ।
विचित्रसर्गहेतुत्वात् मायेत्युक्ता महर्षिभिः ॥
न मिथ्यात्वात्तथात्वे हि ज्ञानमात्रान्निवर्तनम् ।
भवेत्तस्याः दुस्तरत्त्वमुक्तमेवं विरुध्यते ॥
माया नास्तीति विज्ञानान्माया नैव निवर्तते ।
निवर्तते नैव सर्पो नायं सर्प इति भ्रमात् ॥
परमार्थस्य सर्वस्य यथा दण्डो निवर्तकः ।
तथैव भगवद्भक्तिर्मायाबन्धनिवर्तिका ॥
मायायाः कृष्णशक्तेस्तु न नाशो विद्यते सदा ।
किन्तु भक्तेषु सा नैव प्रगल्भा बन्धकर्मणि ॥
नावा नद्याः प्रतरणं यथा सत्यास्तथा पुनः ।
मायायास्तरणं चैव प्रोक्तं भगवदाश्रयात् ॥
सा च जीवं प्रबध्नाति ज्ञानमावृत्य देहिनम् ।
स्वगुणेन परात्मानं तस्य शक्तिर्यतोऽस्ति सा [१]॥

अत्र दर्शनसिद्धान्तानुरूपं मायास्वरूपं प्रतिपादितं वर्तते । माया शब्दस्य विचित्रार्थवत्वं प्रतिपाद्य मिथ्यार्थवाच्यत्वं खण्डितम् । माया नास्तीति विज्ञानान्माया नैव निवर्तते । इत्युक्त्वा मायायाःनित्यत्वं प्रपञ्चितम् । मायायाः भगवच्छक्तिरूपेण प्रतिपादनं कुर्वतोक्तं- मायायाः कृष्णशक्तेस्तु न नाशो विद्यते सदा । अथ च बन्धरूपायाः मायाया अपि भगवदाश्रितानां कृतेऽबन्धकरत्वमेव- किन्तु भक्तेषु सा नैव प्रगल्भा बन्धकर्मणि इति श्लोकेन प्रतिपादितम् । बाहुबलेन तरितुमशक्याः मायायास्तरणं भगवदाश्रयबलात्शक्यमिति तु- मायायास्तरणं चैव प्रोक्तं भगवदाश्रयात् ।

अस्याः मायायाः स्वरूपं वर्णयन् पञ्चतत्त्व निर्णयनामके ग्रन्थे प्राह श्रीकृष्णवल्लभाचार्यः

अथ माया रञ्जनात्मा रागरूपा प्रवर्तिनी ।
छाया माया विचित्रार्थवैभवा त्रिगुणात्मिका ॥
तमोऽज्ञानं चान्धकारश्चाऽऽश्चर्यं जडबन्धना ।

१-आध्यात्मिकतत्त्वाख्यान २०/१२-२४

**जडत्वं तत्र चान्यव्यावर्तकं गण्यते यतः ।।**
**अज्ञानत्वं च वा तादृक् तथाऽऽवरकता च वा ।**
**मायात्वं चापि वै तत्राऽवच्छेदकं तु वा मतम् [१]।।**

अर्थोऽयं श्रीगोपालानंद स्वामिना ईशावास्योपनिषदि प्रथममन्त्रस्य भाष्येऽपि सम्यक् समर्थितः । वस्तुतस्तु मायायाः प्रवाहनित्यत्वमिति साम्प्रदायिकानां विदुषां राद्धान्तः ।

## ४.२ प्रकृतेनाम्नां विवेचनम्

अस्याः प्रकृतेः विषये सत्त्वासत्त्वविषये केषाञ्चनशङ्का जायते । ते प्रतिपादयन्ति यत् यदि प्रकृतिनामकं किञ्चित् तत्त्वं भवेत् तर्ह्युपलभेत यस्मात् कारणात् नोपलभ्यते, तस्मात् कारणात् नास्ति प्रकृतिरिति तेषां मनीषा । एतादृश्याः शङ्कायाः निराकरणं कुर्वता सांख्यकारिकाकारेणाऽभिहितं यत्-सतामपि वस्तूनामनुपलब्धौ अष्टौ कारणानि सन्ति । तानि हि-

**अतिदूरातिसामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।**
**सौक्ष्म्यात् व्यवधानादभिभवात् समानाभिहाराच्च [२]।।** इति ।

अयमाशयो यत् आकाशे अति दूरमुत्पतन्नपि पक्षी दूरातिशयात् नोपलभ्यते इति लोके दृश्यते । अनेनैव प्रकारेण सान्निध्यातिशयोऽपि सतामपि वस्तूनामनुपलब्धौ कारणतामेति । यथा अत्यधिक सन्निकटे विद्यमाना कनीनिका अक्ष्णा नहि गृह्यते । इन्द्रियाणां विनाशोऽपि सतां वस्तूनामनुपलब्धौ कारणं भवति । एतस्मादेव कारणात् अन्धः पुरुषः रूपं नहि पश्यति, बधिरश्च शब्दं नहि श्रुणोति । अनवस्थितमनो पुरुष उच्चारितमपि शब्दं नहि श्रुणोति, पार्श्वतो गतमपि पुरुषं नहि पश्यति । पृष्टश्च प्रतिवक्ति 'अनवस्थितमना आसम् नाश्रुण्वम् इति '।

अतिसूक्ष्मताऽपि सतो वस्तुनोऽनुपलब्धेः कारणं भवति । अत्यन्तसूक्ष्मत्वादेव परमाणवो नह्युपलभ्यन्ते । अनेनैव प्रकारेण व्यवधानमपि अनुपलब्धेः कारणं भवति । यथा कुड्यादिव्यवहितं राजदारादिकं न पश्यति कोऽपि । अभिभवोऽपि अनुपलब्धेः कारणं भवति सतो वस्तुनः । यथा सूर्यप्रभयाऽभिभूतं दिवसे विद्यमानमपि चन्द्रतारादिकं नोपलभ्यते । समानाभिहरणमष्टमं कारणं विद्यते । यथा तोयदविमुक्तं सागरे पतितं जलबिन्दु नोपलभते कश्चन पृथक् ।

---

१-पञ्चतत्त्व निर्णयः पृ. ११५

२-सांख्यकारिका संख्या-७

कारिकायां चकारेणानुद्भवरूपमपि नवमं कारणं भवति संगृहीतम् । तथाहि दुग्धे विद्यमानमपि दधि नोपलभ्यतेऽनुद्भूतत्वात् ।

अत्रेयं शङ्का जायते यत् एतेषु नवसंख्याकेषु अनुपलब्धेः कारणेषु केन कारणेन नहि भवति सत्त्याः प्रकृतेरूपलब्धिरिति । अत्राह सांख्यकारिकाकारः-

**सौक्ष्म्यात् तदनुपलब्धिर्नाभावात् कार्यतस्तुदुपलब्धेः ।**
**महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च** [१]।।

अयमाशयो यत यस्मात् कारणात् प्रकृतिरतीवसूक्ष्मा विद्यते तस्मादेव कारणात् तस्या उपलब्धिर्नहि भवति । यतः प्रकृतेर्महदादिकानि कार्याणि सन्ति तस्मादपि कारणात् प्रकृतेः सत्त्वमनुमीयते । कार्यं दृष्ट्वा कारणस्यानुमानस्य नियमात् । लोके प्रातःकाले आर्द्रां भूमिं दृष्ट्वा रात्रौ सञ्जातायाः वर्षाया अनुमानं करोति सामान्योऽपि जनः ।

अस्याः कारिकायाः व्याख्यायां **वाचस्पति मिश्रोऽप्याह**- सांख्यतत्त्वकौमुद्यां; कतमत् पुनरेतेषु कारणं प्रधानादीनामनुपलब्धौ इत्यत आह सौक्ष्म्यादिति । अथाभावादेव सप्तमरसवदेतेषामनुपलब्धिः कस्मान्न भवति इत्याह 'ना भावात्' इति । कुतः '**कार्यतस्तदुपलब्धेः**।' 'तत' इति प्रधानं परामृशति। पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति '**संघातपरार्थत्वात्** [२]' इति ।

दृढतरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्तमानमयोग्यत्वान्न प्रवर्तते इति कल्प्यते । सप्तमस्तु रसो न प्रमाणेनावधारित इति न तत्र प्रत्यक्षस्यायोग्यता शक्याऽध्यवसितुमित्यभिप्रायः ।

किं पुनस्तत्कार्यं यतः प्रधानानुमानम् ? इत्यत प्राह महदादि तच्च कार्यम् इति । एतच्च यथागमकं तथोपरिष्टादुपपादयिष्यते । तस्य च कार्यस्य विवेकोपयोगिनी सारूप्यवैरूप्ये आह 'प्रकृति सरूपं विरूपं च ' इति । एते तूपरिष्टाद्विभजनीये इति ।

प्रकृतेर्भावरूपत्वादेव सर्वे आस्तिकाः दार्शनिकाः प्रकृतेः स्वरूपस्य, तस्य कार्यादिकस्य च विवेचनं कुर्वन्ति । यदि प्रकृतिर्नो भवेदथवा मिथ्या स्यात् तर्हि कथं तस्याः स्वरूपविवेकः कृतः स्यात् । नहि कोऽपि आकाशकुसुमस्य स्वरूपं निरूपयति अप्रमत्तः ।

---

१-सांख्यकारिका संख्या- ८
२-तत्रैव सांख्यतत्त्वकौमुदी

प्रकृतेरेकं नामाऽविद्येति प्रागभिहितं मया। अत्राविद्याशब्दे पर्युदासो नञ् विद्यते। तथा चोक्तं वाक्यपदीये भर्तृहरिणा-

**द्वौ नञौ समाख्यातौ पर्युदासप्रसज्यकौ।**
**पर्युदास सद्ग्राही प्रसज्यस्तु निषेधकृत्॥**

नञः समासस्य द्वौ भेदौ भवतः, पर्युदासनञ्प्रसज्य प्रतिषेधनञ्च। तत्र पर्युदासो नञ् सदृशरूपस्यार्थस्य प्रधानतया बोधको भवति; किन्तु अन्येऽपि तस्य चत्वारः अर्थाः भवन्ति, तद्विरुद्धत्वं, तदल्पत्वं, तदनौचित्यं, तद्भिन्नत्वञ्च। प्रसज्यप्रतिषेधस्यैवाभावरूपो भवत्यर्थः। यस्मात् कारणादत्रोत्तरपदेनास्त्यन्वितो नञ् तस्मात् कारणादत्र पर्युदासनञ्। अत एवात्र तद्विरुद्धत्वरूपेऽर्थे पर्युदासोनञ् विद्यते। अत एवाविद्या पदस्य विद्याभिन्नरूपोऽर्थो भवति।

सेयमविद्या अज्ञानस्वरूपा वर्तते। तस्याः रूपद्वयं भवतीति प्राह महर्षिः पराशरः श्रीविष्णुपुराणे-

**श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनंदन।**
**अनात्मन्यात्म बुद्धिर्या अस्वे स्वमिति या मति[१]।**

अयमर्थो यत् यया आत्मव्यतिरिक्ते देहेन्द्रियमनःप्राणज्ञानादिष्वात्मत्व बुद्धिर्भवति, अस्वेषु वस्तुषु च स्वीयत्व बुद्धिर्जायते साऽविद्यैव भवति। तयैव बद्धजीवानां भगवत्स्वरूपस्य तिरोधानं भवति। रूप रस गन्ध-स्पर्श-शब्दाख्येषु विषयेषु भोग्यत्वस्य बुद्धिरुपजायते।

तस्याश्चाविद्यायाः भेदद्वयं जायते अन्यथाज्ञानम् विपरीतज्ञानञ्च। अन्यथाज्ञानं नाम धर्मविपर्यासः। विपरीतज्ञानं नाम धर्मिविपर्यासः। धवले शंखे पीतत्व ज्ञानं धर्मविपर्यासकृतम्। अश्वे महिषत्वज्ञानं धर्मि विपर्यासकृतं भवति।

## ४.३ माया चतुर्विंशति तत्त्वात्मिका

**'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'**[२] इत्यादिषु पुरोवादिनीषु श्रुतिषु अग्रे शब्देन यस्य निर्देशः कृतो वर्तते तस्मिन्प्रलयकाले विद्यमानानां सत्त्वरजस्तमसां साम्यावस्थापन्ना प्रकृतिरेव मूलप्रकृतिरित्यभिधीयते। तस्मिन् काले अस्याः प्रकृतेः गुणेषु वैषम्यं नहि भवति। सर्वे गुणाः समानरूपेण भवन्ति। जायन्ते च तस्यां तदा सदृशाः विकाराः। प्रलयकालस्य समाप्तौ सत्यां

---

१-विष्णुपुराणम् ६/१७/१०-११
२-छांदोग्योपनिषत् ६/२/१

भगवतः सत्यसंकल्पेन प्रकृतौ क्षोभः संजायते। तेन प्रकृतेः गुणेषु वैषम्यं भवति तस्य फलरूपेण।

चतुर्विंशतितत्त्वात्मिकायाः प्रकृतेर्विवेचनं कुर्वता श्रीमल्लोकाचार्येण प्रोक्तम्- **'तेषु प्रथमं तत्त्वं प्रकृतिः । इयं च विभक्ततम इति अविभक्ततम इति, अक्षरमिति कतिपयावस्थावती भवति** [1]'।

अनयोश्चूर्णिकयोः छात्रतोषिण्यामाचार्यः शिवप्रसाद द्विवेदी लिखति-

'तेषु चतुर्विंशति तत्त्वेषु प्रथमं तत्त्वं प्रकृतिः । अस्याः सन्ति अक्षरादिकाः कतिपया अवस्था इति **'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देवे एकी भवति** [2]'। इति श्रुतिरेव प्रतिपादयति । इति श्रुत्यनुसारेण संसारनिवृत्तेरवस्थाऽव्यक्तावस्था तन्निवृतिरूपावस्थाऽक्षरावस्था, तस्यां निवृतिस्तमोऽवस्थाः, तमसः परमात्मना सहैकीभवनमेवाविभक्ततम इति प्रोच्यते [3]'।

अयमाशयः- प्रलये प्रकृतेरविभक्ततमाऽवस्था भवति, सृष्टिकाले च सम्प्राप्ते प्रकृतिः नामरूपविभागार्हत्वाद् विभक्ततम इति प्रोच्यते। परमात्मनः सत्यसंकल्पेन पुरुष समष्टिगर्भत्वम्प्राप्य स्थितायाः प्रकृतेरवस्थाऽक्षरावस्थेति व्यपदिश्यते । तमोऽवस्थायाः निवृत्तौ अक्षरावस्था भवति। अस्यामवस्थायां प्रकृतिः इयम्प्रकृतिः आस्था पुरुषसमष्टिरिति विवेचनार्हा भवति। इमाः सर्वाः प्रकृतेरेवावस्थाः भवन्ति। आसु तत्त्वान्तरत्वं नास्ति [4]'। इति।

प्रकृतौ गुणवैषम्ये सञ्जाते तस्यां महदादिकाः विकाराः समुद्भवन्ति । तथाहि-प्रकृतेर्महदुद्भवति अयमपि सात्त्विकराजसतामसभेदने त्रिप्रकारको भवति। महतः सात्त्विकराजसतामसभेदभिन्नः त्रिप्रकारको भवत्यहङ्कारः । तत्र सात्त्विकाहंकारात् पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनश्च जायन्ते । तामसाहंकाराच्च जायन्ते पञ्चमहाभूतानि पञ्चतन्मात्राणि च क्रमशः। एतेषामुत्पत्ति क्रमः-भूतादेश्शब्दतन्मात्रमुत्पद्यते, तस्मादाकाशः स्पर्शतन्मात्रञ्चोत्पद्येते । ततो वायुः रूपतन्मात्रञ्चोत्पद्येते । ततस्तेजो रसतन्मात्रञ्चोत्पद्येते । तत आपो गन्धतन्मात्रञ्चोत्पद्येते । ततश्च पृथिव्युत्पद्येते ।' इति । परञ्च रामानुजदर्शनमहा विदुषां द्विवेदीमहाभागानामिदं कथनं रामानुजमतानुसारेण वर्तते । श्री स्वामिनारायणसिद्धान्तानुसारेण तु राजसाहंकारादेवेन्द्रियाणि जायन्ते । अत एवेन्द्रियाणां वैकारिकत्वमौचित्यं नो बिभर्ति।

---

१-तत्त्वत्रयम् अचितप्रकरणम् सूत्रम् १२-१३
२-सुबालोपनिषत् २/२
३-तत्त्वत्रयम् अचितप्रकरणम् सूत्रम् २६
४-तत्त्वत्रयम् अचितप्रकरणम् सूत्रम् २६

एतेषु प्रकृतेः तत्त्वेष्वष्टौ प्रकृतयः षोडशविकाराश्च सन्ति। श्रुतिरप्यभिधत्ते- '**अष्टौ प्रकृतयः षोडशविकाराः**[१]'। इति । अत्र प्रकतिः, महान्, अहङ्कारः पञ्चतन्मात्राणि इत्येते प्रकृतयः सन्ति, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चभूतानि च विकाराः सन्ति ।

## ४.४ महत्तत्त्वनिरूपणम्

महत् तत्त्वं प्रकृतेर्विषमविकारेषु प्रथमं तत्त्वं वर्तते । अस्य तत्त्वस्य निरूपणं कुर्वता श्रीकृष्णवल्लाभाचार्येणाभिहितम्- '**प्रकृतेर्महत् तत्त्वमुत्पद्यते, तच्च सात्त्विकराजसतामसभेदात् त्रिधा भवति । तच्चाज्ञानाऽधर्माऽध्य वसायजनकं भवति । अव्यक्तावस्थाऽव्यवहितोत्तरावस्थावद्द्रव्यत्वम्, अहङ्कारावस्थाऽव्यवहितपूर्वाऽवस्था विशिष्टद्रव्यत्वं वा, महत्तत्त्वस्य लक्षणम्**[२]'।

अनेन कृतेन विवेचनेनायमर्थो भवति निश्चितो यत् महत् तत्त्वस्य त्रयोभेदाः भवन्ति । त इमे भेदाः गुणभेदकृताः सन्ति । इदं महत् तत्त्वं अज्ञानं, अधर्मं, अध्यवसायं च जनयति ।

तत्त्वत्रयग्रन्थकर्ता श्रीलोकाचार्योऽपि उपर्युक्तस्यैवार्थस्य समर्थनं कुर्वन् वक्ति-

'**विषम विकारेषु प्रथमो महान् । अयञ्च सात्त्विको राजसःतामसश्चेति त्रिविधः, अध्यवसायजनकश्च**[३]'।

अनेनायमप्यर्थो निस्सरति यत् अध्यवसायजनकत्वमेव, महत् तत्त्वस्य प्रमुखं कार्यम् । सोऽयं महान् बुद्धिलक्षणं भवति । सेयं बुद्धिः त्रिप्रकारवती भवति। आसां तिसृणां स्वरूपनिरूपणं स्वयमेव भगवान् गीतायां करोति। तथा हि-

**प्रवृत्तिञ्च निवृत्तिञ्च कार्याकार्ये भयाभये ।।**
**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ।।**
**यया धर्ममधर्मञ्च कार्यञ्चाकार्यमेव च ।**
**अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी ।।**
**अधर्मं धर्ममिति या मन्यते तमसावृता ।**
**सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी**[४]'।। इति ।

सांख्यकारिकाकारस्तु वक्ति यत्-

---

१-गर्भोपनिषत् ३
२-स्वा. वेदान्तसार पृ. २
३-तत्त्वत्रयम् अचितप्रकरणम् चूर्णिका पृ. २१-२२
४-भगवद्गीता १८/३०-३२

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।**
**सात्त्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम्** [१]॥
श्रीहरिवाक्यसुधासिन्धुकारास्तु - **महत् तत्त्वं चित्तैक्येन प्रकीर्तितम्** [२]।
**शुद्धसत्त्वमयं शान्तं कूटस्थं चातिनिर्मलम् ।**
**जगदङ्कुररूपं च ज्ञेयं तदपि लक्षणैः** [३] ॥
एभिर्वाक्यैः शतानन्दमुनिना महत् तत्त्वस्य सत्त्वप्रधानताभिहिता ।

## ४.५ अहङ्कारतत्त्वनिरूपणम्

प्राकृतान्महत्तत्त्वादुत्पद्यतेऽहङ्कारः । सोऽपि गुणानां भेदात् त्रिप्रकारको भवति वैकारिक तैजसभूतादिभेदात् ।

श्रीमत् कृष्णवल्लभाचार्या अपि वदन्ति-

**'महत् तत्त्वतोऽहङ्कार उत्पद्यते । अयमपि सात्त्विकराजसतामस भेदात् त्रिधा भवति। स च देहादावात्माद्यभिमानजनको भवति** [४]'।इति ।

यतीन्द्रमतदीपिकाकारः श्रीनिवासाचार्यस्तु वक्ति यत्-

**महतोऽहङ्कार उत्पद्यते । सोऽपि सात्त्विकाहङ्कारो, राजसाहङ्कारः, तामसाहङ्कारश्चेति त्रिविधो भवति** [५]'। इति ।

तत्त्वत्रयकारः श्रीलोकाचार्योऽपि वक्ति अत्र- '**अस्माद् वैकारिकराजस भूतादिभेदेन त्रिविधोऽहङ्कार उत्पद्यते । अहङ्कारोऽभिमानहेतुः । अयमर्थो यत् महत्तत्त्वतोऽहंकारतत्त्वमुत्पद्यते । सोऽपि सात्त्विकराजसतामसभेदात् त्रिप्रकारको भवति । एतेषां क्रमेण वैकारिकतैजसभूतादिरिति नामान्तराणि भवन्ति । अहङ्कारतत्त्वमभिमानस्य हेतुः** [६]'। महर्षिः पराशरोऽपि सस्मार विष्णुपुराणे-

**वैकारिकस्तैजसश्च भूतादिश्चैवतामसः ।**
**त्रिविधोऽयमहङ्कारो महत् तत्त्वादजायत** [७]॥ इति ।
सत्सङ्गिजीवनेऽप्यभिहितम्-
**अथ मायाकालकर्मस्वभावैश्च विकुर्वतः ।**
**महत् तत्त्वादहङ्कारः सह रुद्रेण जायते ।**
**ज्ञानशक्तिः क्रियाशक्तिर्द्रव्यशक्तिश्च स त्रिधा ।**
**वैकारिकस्तैजसश्च तामसश्चेति कथ्यते ॥**

---

१-सांख्यकारिका संख्या-२३
२-भाषावचनामृतम् १२
३-हरिवाक्यसुधासिन्धुः १२/१०
४- श्री स्वा. वेदान्तसारः पृ. २
५-यतीन्द्रमतदीपिका पृ. ७२
६-तत्त्वत्रयम् अचितप्रकरणम् चुर्णिका पृ. २३-२४
७- विष्णुपुराणम् १/२/३५

अयमाशयो यदभिमाननामस्यान्तःकरणस्य वृत्तेरनुग्राहकोऽहङ्कारो भवति।

## ४.६ ज्ञानेन्द्रियाणां निरूपणम्

अहङ्कारस्य त्रैविध्यमुपरिष्टादभिहितम् । तत्र सात्त्विकाहङ्कारात् वैकारिकापरनाम्नः एकादशेन्द्रियाणि जायन्त इति सामान्यतो दार्शानिकानां मनीषा। परन्तु श्रीस्वामिनारायणदर्शनस्येयं प्राचाल्या मान्यता वर्तते यत् सात्त्विकाहङ्कारात् मनः तेषां तेषामिन्द्रियाणामधिष्ठात्र्यो देवताश्च जायन्ते राजसाहङ्कारात् च ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च जायन्ते, अस्मिन् विषये श्रीकृष्णवल्लभाचार्याः लिखन्ति-

**'तत्र सात्त्विकाहङ्काराद् देवतामनसी भवतः। देवता दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रका दश । राजसाहङ्कारादिन्द्रियाणि श्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणिपादपायूपस्थाऽभिधानानि जायन्ते । राजसाऽङ्कारजन्यत्वे सति द्रव्यत्वमिन्द्रियाणां लक्षणम्**[१]'। इति।

अत्र केचन आशेरते-इन्द्रियाणामहङ्कारिकत्वं श्रुतिविरुद्धम्, सुबालश्रुत्या इन्द्रियाणां तन्मात्रेषु एव लयस्य श्रवणात् । यतो यदुत्पद्यते तत्रैव तस्य लयो भवतीति सर्वदर्शनसम्मतत्वात्, मृद उत्पन्नो घट मृदि एव लीयत इति दर्शानाच्च। तथा च श्रुतिः-

**'आकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि, भूतादौ लीयन्ते** '। इति। अनया श्रुत्या तन्मात्राणि एव इन्द्रियाणां कारणानि सिद्धयन्ति। अत्रोच्यते-श्रुतौ हि '**इन्द्रियाणि तन्मात्रेषु**' इति श्रूयते न तु तन्मात्रेषु लीयन्ते इति। अत एव प्रलयकाले इन्द्रियाणि तन्मात्रेषु संसक्तानि भवन्तीत्येव मन्तव्यम्। नो चेत्- '**आकाशमिन्द्रियेष्वि**त्यत्रापि आकाशस्य इन्द्रियेषु लयस्य प्रसङ्गात्। न च इन्द्रियाणि भवन्ति आकाशस्य प्रकृतीनि।

यत्विन्द्रियाणां क्वचनं भौतिकत्वमभिहितं तत्तु भूतानामिन्द्रियाणा माप्यायकत्वात्। आप्यायकत्वञ्च पोषकत्वमेव। एतस्मादेव कारणात् भगवान् पराशरोऽप्याह-

**तैजसानीन्द्रियाण्याहुः देवा वैकारिका दश ।**
**एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः** [२] ।।

इत्यत्र स्पष्टरूपेण इन्द्रियाणां राजसाहंकारजन्यत्वं, तेषामधिष्टातृदेवतानाञ्च सात्त्विकाहङ्कारजन्यत्वमभिहितमस्ति।

---

१-श्री स्वा. वेदान्तसारः पृ. ३
२-विष्णुपुराणम् १/२/४६-४७

तत्रेन्द्रियाणि सर्वाणि द्वेधा विभज्यन्ते–ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च । तत्र षोढा भवन्ति ज्ञानेन्द्रियाणि– मनःश्रोत्रत्वक्चक्षुरसनाघ्राणाख्यानि । गीतायामपि स्वयं भगवता–

**'मनः षष्ठानीन्द्रियाणीति** [१]**'।**

**तत्र ज्ञानं प्रसरणशक्तमिन्द्रियं ज्ञानेन्द्रियमिति । तत्र स्मृत्यादि प्रसरणानुकूल शक्तिमत्त्वे सतीन्द्रियत्वं मनसो लक्षणम् । तदिदं मनो हृदय प्रदेशवृत्ति बुद्ध्यहङ्कारचित्तादि शब्दवाच्यम्** [२]'। तथा च श्रीभाष्य कारेणाभिहितम्– **'अध्यवसायाऽभिमान चिन्तारूपवृत्ति भेदान् मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते** [३]'। इति

मतान्तराणामनादरणीयत्वं प्रतिपादयन् श्रीकृष्णवल्लभाचार्योऽभिधत्ते–

**'केचितु राजसाहङ्कारसहकृतात् सात्त्विकाहङ्कारादेकादशेन्द्रियाणि जायन्ते । अतः सात्त्विकाहङ्कारोपादानकं द्रव्यमिन्द्रियम् । अथ राजसाहङ्कारसहकृतात् तामसाऽहङ्कारात् तन्मात्राण्याकाशादीनि च जायन्ते' इति स्वीकुर्वन्ति ।**

**सांख्यास्तु मनसः कर्मेन्द्रियत्वमपि स्वीकुर्वन्ति । तन्न युक्तम्–तस्य ज्ञानद्वारैव कर्महेतुत्वात् । साक्षात् कर्महेतुत्वाभावादिति** [४]**'।**

श्रीस्वामिनारायणमतानुसारेणेमे समे विचारकाः अनादरणीयाः सन्ति । एतेषां मतानां तर्कप्रमाणपराहतत्वात् ।

## ४.७ कर्मेन्द्रियाणां निरूपणम्

येन प्रकारेण ज्ञानेन्द्रियाणि राजसाहङ्कारजन्यानि तेनैव प्रकारेण कर्मेन्द्रियाण्यपि । यथा ज्ञानेन्द्रियाणि रूपरसगन्धस्पर्शशब्दाख्यानां विषयाणां ज्ञानसाधनानि भवन्ति, तेनैव प्रकारेण कर्मेन्द्रियाण्यपि वर्णोच्चारण–आदान विहरण–त्यागानन्दविशेषरूपक्रियाणां साधनानि भवन्ति । अत एव ज्ञानेन्द्रियकर्मेन्द्रियाणां समानरूपेण इन्द्रियत्वं सिद्ध्यति । कर्मेन्दियाण्यपि पञ्च– वाक्–पाणि–पाद–पायूपस्थाख्यानि । तत्र वागिन्द्रियं वार्णोच्चारणसाधनतामेति, पाणीन्द्रियं चादानक्रियाया, पादेन्द्रियं तु विहरण गमनादिक्रियायाः साधनं भवति । मलत्यागादिक्रियायाः साधनं पाय्विन्द्रियम् । आनन्द विशेषस्य साधनं हि उपस्थेन्द्रियम् भवति ।

---

१–भगवद्गीता १५/७
२–स्वा. वेदान्तसारः पृ. ३
३–स्वा. वेदान्तसारः पृ. ३ उद्धृतम्
४–स्वा. वेदान्तसारः पृ. ३

इमानि सर्वाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चातीन्द्रियाणि, तत्-तत् संस्थान् वर्तीनि भवन्ति। यथा कर्णकुहरवर्तिश्रोत्रेन्द्रियम्। जिह्वाग्रवर्ति च भवति वागिन्द्रियम्। इमानि सर्वाण्यणुपरिमाणानि भवन्ति।

नैयायिकाः वैशेषिकाश्च कर्मेन्द्रियाणामिन्द्रियत्वं नहि स्वीकुर्वन्ति। परञ्च तेषामेतादृशी मनीषाश्रुतियुक्तिभ्यां पराकृता भवति। कर्मेन्द्रियाणामिन्द्रियत्वसाधिका युक्तयस्तूपर्येव मयोपन्यस्ता। तेषामिन्द्रियत्वसाधकानि प्रमाणानि च-

**'एका कन्या दशेन्द्रियाणि च।' दशेमे पुरुषे प्राणाः**[१]। इत्यादिकाः श्रुतय भवन्ति। अत्र कन्या शब्देन मनसः, प्राण शब्देन इन्द्रियाणां ग्रहणञ्च भवति।

## ४.८ 'देवा वैकारिका दश' इति वाक्यविचारः

श्रीविष्णु पुराणे इन्द्रियाणां तदधिष्ठातृदेवतानां च निरूपणं कुर्वता महर्षि पराशरेणाभिहितम्-

**तैजसानीन्द्रियाण्याहुः देवा वैकारिकाः दश**[२]। इति। अस्या सूक्तेरर्थं कुर्वन्तो रामानुजीयाः प्राहुः यदत्र देव शब्देन इन्द्रियाण्येव गृह्यते। सूक्तेः पूर्वार्धेन महर्षिणा पूर्वपक्षस्य संग्रहः कृतो वर्तते। अत एव ये केचन इन्द्रियाणां तैजसत्वमापादयन्ति तन्नोचितम्। दशसंख्याकानामिन्द्रियाणां वैकारिकत्वात् सात्त्विकाहङ्कारजन्यत्वादिति।

परञ्च रामानुजीयानामस्याः कल्पनायाः अप्रामाणिकत्वादनादरणीयतैवापतति। महर्षिरस्मिन् श्लोके पूर्वपक्षमनूद्य सिद्धान्तं प्रतिपादयतीति कथने किमपि प्रमाणं नास्ति। अत एव राजसाहंकारादेवेन्द्रियाणामुत्पत्तिः स्वीकर्तव्या। देव शब्देन चात्र दशसंख्याकाः तेषां तेषामिन्द्रियाणामधिष्ठात्र्यो देवता एव स्वीकर्तव्याः।

## ४.९ मनसोऽनिन्द्रियत्वशङ्का

अद्वैतिनः मनस इन्द्रियत्वं नहि स्वीकुर्वन्ति। वेदान्तपरिभाषाकारो धर्मराजाध्वरीन्द्रः मनसः इन्द्रियत्वं निराकर्तुं प्राकृतस्येन्द्रियत्वमाशंक्याचष्टे-

'नन्वन्तःकरणस्येन्द्रियतयाऽतीन्द्रियत्वात् 'कथमहमिति प्रत्यक्ष विषयतेति? उच्यते न तावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति। मनः षष्ठानीन्द्रियाणि' इति भगवद्गीतावचनं प्रमाणमिति चेत् न, अनिन्द्रियेणापि मनसा षट्त्वसंख्यापूरणाविरोधात्। नहीन्द्रियगतसंख्यापूरणमिन्द्रियेणैवेति नियमः। 'यजमानपञ्चमां

१-मानमेयप्रकाशिकायाः पृ.१३० उद्धृता श्रुतिः २- विष्णुपुराणम् १/२/४६

इडां भक्षयन्ति ।' इत्यत्र वेदगत पञ्चत्वसंख्याया अवेदेनापि महाभारतेन पूर्णदर्शनात् । **'वेदानध्यापयामास महाभारतपञ्चमान्'** इत्यत्र ऋत्विक्गतपञ्चत्व संख्याया अवेदेनापि महाभारतेन पूरणदर्शनात् । **'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः** । इत्यादि श्रुत्या मनसोऽतीन्द्रित्वावगमाच्च[१]'।

न चैवं मनसोऽनीन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं न स्यादिन्द्रियजन्यत्वादिति वाच्यः न हीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वम्, अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः, ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्वापत्तेश्च ।' इति ।

## ४.१० मनस इन्द्रियत्वनिरूपणम्

धर्मराजध्वरीन्द्रेणाभिहितमेतन्मनसोऽनीन्द्रियत्वं प्रमाणपदवीं न लभते । प्रतिपादनस्यास्य तर्कशरणत्वात् प्रमाण प्रतिषिद्धत्वाच्च । तर्काणामप्रतिष्ठितत्वं भगवान् बादरायण एवाभिधत्ते- **'तर्काप्रतिष्ठानात्**[२]' इति सूत्रेण । **'इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः**[३]'। इति श्रुत्या नहि मनसोऽनिन्द्रियत्वं सेद्धुमर्हति । अस्यां श्रुतौ तु मनसः ज्ञानेन्द्रियेभ्यः तेषां विषयेभ्यश्च मनसः प्राबल्यं प्रतिपादितं भवति । अस्याः श्रुतेः भाष्ये योगिवर्यो **गोपालानन्द स्वाम्यप्यभिधत्ते**-

'इन्द्रियेभ्यः -चक्षुरादिभ्यः अर्थाः- शब्दादयः, पराः- प्रबलाः । अवगत्य शब्दादीन् विषयाननर्थदान् शून्यागारमध्य मध्यासीनस्य इन्द्रियनिग्रहे प्रवृत्तस्यापि समुपगते विषयसान्निध्ये सपदि संक्षुभ्यन्त्येन्द्रियाणि । तदिन्द्रियापेक्षया वशीकार्यत्वे प्रधाना अर्थाः। अर्थेभ्यश्च परं मनः दूरीकृतेऽप्यर्थे पिहितेष्वपीन्द्रियद्वारेषु मनश्चेन्न वशे प्रसरेदेव परितः ततश्च नेन्द्रियजयः स्यात् । अतो मनसो वशीकृतस्य तदुभयवशीकरणमूलत्वान्मनसः ततः परत्वम्[४]'। इति ।

मनस इन्द्रियत्वं च सूत्रयामास महर्षिः गौतमः न्यायदर्शनस्य- **'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्**[५]'। इति सूत्रेण । किञ्च भगवता श्रीकृष्णेनापि स्पष्टरूपेण मनस इन्द्रियत्वं समर्थयताऽभिहितम् 'मनः षष्ठानीन्द्रियाणी' इति ।

## ४.११ इन्द्रियाणां भौतिकत्वनिरासः

नैयायिका वैशेषिकाश्चेन्द्रियाणां भौतिकत्वं प्राहुः । महर्षिः कणाद इन्द्रियाणां भौतिकत्वं प्रतिपादयन् वक्ति- **'भूयस्त्वाद् गन्धवत्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः**[६]'। इति सूत्रेण घ्राणेन्द्रियस्य पार्थिवत्वम्, **'तथापस्तेजो वायुश्च**

१-वेदान्तपरिभाषा धर्मराजध्वरिन्द्रकृत पृ. ३२
२-ब्रह्मसूत्र २/१/११
३-कठोपनिषत् १/३/१०
४- तत्रैव गोपालानंद स्वामी कृतं भाष्यम्
५-न्यायदर्शनम् १/१/१६
६-वैशेषिकदर्शनम् ८/२/५

**रसरूपस्पर्शविशेषात्** [१]"। इति सूत्रेण च जलतेजोवायूनाञ्च जिह्वाचक्षुस्त्वचां क्रमशः पार्थिवत्वं तैजसत्वं वायवीयत्वं च समर्तिथत्। अनेनेन्द्रियाणां भौतिकत्वं भवति सिद्धं वैशेषिकमतानुसारेण। अनेनैव प्रकारेण महर्षिः गौतमोऽपि न्यायदर्शने समर्थयामास इन्द्रियाणां भौतिकत्वम्। परञ्चेदं नैयायिकानां वैशेषिकाणाञ्च प्रतिपादनं शास्त्र विरुद्धमाभाति। महर्षिणा पराशरेणेन्द्रियाणामाहङ्कारिकत्वं '**तैजसानी न्द्रियाण्याहुः देवा वैकारिका दशा**।' इति सूक्त्या प्रतिपादनात्। यत्तुमोक्ष धर्मे-

'**शब्दः श्रोत्रं तथा खादि त्रयमाकाशसम्भवम्** [२]"। इत्यादिनेन्द्रियाणां भौतिकत्वमभिहितम्। तदपि इन्द्रियाणां भूतैरप्यायितत्वात्। भूतैरेवाप्यायितानि भवन्तीन्द्रियाणि। अत एवेन्द्रियाणामाहङ्कारिकत्वमेव स्वीकर्तव्यम्।

## ४.१२ पञ्चतन्मात्राणां निरूपणम्

भूतानां या सूक्ष्मावस्था भवति सैव तन्मात्रशब्देनाभिधीयते। सेयमवस्था तेषां तेषां भूतानामुत्पत्तेरव्यवहितपूर्वक्षणवर्तिनी भवति। अत एव "**भूतानामव्यवहितपूर्वसूक्ष्मावस्थाविशिष्टद्रव्यत्वम्** [३]"। इति तन्मात्र-सामान्यलक्षणमाह श्रीकृष्णवल्लभाचार्यः। इमानि तन्मात्राणि पञ्च सन्ति। शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रञ्च। तत्र तामसाहंकाराकाशयोर्मध्यमावस्था विशिष्टं द्रव्यं शब्दतन्मात्रमित्यभिधीयते। येन प्रकारेण दुग्धदध्नोर्या मध्यमावस्था भवति भवति तद्वद् भवति तन्मात्रावस्था। आकाशवाय्वोर्मध्यमावस्था विशिष्टं द्रव्यं स्पर्शतन्मात्राशब्देनाभिधीयते। अनेनैव प्रकारेण वायुतेजसोर्मध्यमावास्था विशिष्टं द्रव्यं रूपतन्मात्रेत्यभिधीयते। तेजसोजलयोर्मध्यमावस्था विशिष्टं द्रव्यं रसतन्मात्रेत्यभिधीयते। किञ्च जलपृथिव्योर्मध्यमावस्था विशिष्टं द्रव्यं गन्धतन्मात्रेत्यभिधीयते।

इमानि तन्मात्राण्येव जनकानि भवन्ति तेषां तेषां भूतानाम्।

## ४.१३ पञ्चमहाभूतानां निरूपणम्

पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्च महाभूतानि सन्ति। एतेषां पञ्च महाभूतानां निरूपणं कुर्वन्ती श्रुतिरभिधत्ते- '**तस्माद् वा एतस्मादात्मनः आकाशः सम्भूतः, आकाशाद् वायु, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी** [४]"। अनया श्रुत्या सर्वप्रथमं भूतं आकाशः सिद्धयति। सोऽयमाकाशः शब्दगुणको भवति। नैयायिका आकाशस्य नित्यत्वं स्वीकुर्वन्ति किन्तु श्रुतिरेवाकाशस्य जन्यता समर्थयति। अत एवाकाशस्य नित्यत्वकल्पना

---

१-वैशेषिकदर्शनम् ८/२/६
२-महाभारतम् मोक्षधर्मः
३-श्री स्वा. वेदान्तसारः पृ. ४
४-तैत्तिरियोपनिषत् २/१/१

श्रुतिविरुद्धा। बौद्धा आकाशस्य तुच्छत्वं प्रतिपादयन्ति तेषां मतं खण्डयन् महर्षिः बादरायणः प्राहः '**आकाशे च विशेषात्**[१]'। अयमाशयो यत् येन प्रकारेण पृथिव्यादीनां प्रत्यक्षं भवति तेनैव प्रकारेण आकाशस्यापि 'इहाऽऽलोकः' इति व्यवहारेण प्रतीयते । अत एव नास्त्याकाशस्याभावः। नीलो नभः' इत्यादि प्रतीत्या तस्य रूपवत्त्व प्रतीतिः । आकाशे नीलता च पञ्चीकरण प्रक्रियया सिद्धयति।

द्वितीयं भूतं वायु वर्तते, वायुर्भवति शब्दस्पर्शयोः गुणयोराश्रयः। रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम् । तृतीयं भूतं, तेजः । तच्च शब्दस्पर्शरूपवद् भवति। चतुर्थं द्रव्यं जलं, तदपि शब्दस्पर्शरूपरसवद् भवति। पृथिवी पञ्चमं भूतम्। सा च शब्द स्पर्श-रूप-रस-गन्धवती भवति।

तत्र आकाशस्य शब्दो विशेषो गुणः । वायोः स्पर्शो विशेषो गुणः । तेजसश्च भास्वररूपं विशेषो गुणः। जलस्य रसो विशेषो गुणः। पृथिव्याश्च गन्धो विशेषो गुणः । इमानि सर्वाणि भूतानि जन्यानि सन्ति पञ्चीकृतानि।

## ४.१४ पञ्चमहाभूतानामुत्पत्तिक्रमः

महाभूतानामुत्पत्तिक्रमं निम्नांकितेन प्रकारेण निरूपयन्ति पण्डित वरेण्यः श्रीकृष्णवल्लभाचार्यः- '**अथ तामसाहङ्काराच्छब्दतन्मात्रं भवति। तत्राऽनुद्भूतः शब्दः शब्दतन्मात्रादाकाशो जायते, तत्रोद्भूतः शब्दः। स्पर्शशून्यत्वे सत्युद्भूतशब्दवत्त्वं आकाशस्य लक्षणम्**[२]'।

आकाशात् स्पर्शतन्मात्रम् । आकाशवाय्वोर्मध्यमावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम्। तत्राऽनुद्भूतः स्पर्शः शब्दश्च । स्पर्शतन्मात्राद्वायुः । तत्रोद्भूतः स्पर्शः शब्दश्च । 'रूपशून्यत्वे सत्युद्भूतस्पर्शवत्त्वं वायोर्लक्षणम् ।' अस्मात् त्वगिन्द्रियमात्रग्राह्यद्रव्यत्वं, अनुष्णाशीतस्पर्शवत्त्वे सति गन्धशून्यत्वं वा वायोर्लक्षणम्। स च बाह्यो भूतात्मको महान् वायुरिति। शरीर धारणादिहेतुर्वायुः प्राणाभिधानः, स च पञ्चविधः प्राणापानसमानव्यानोदानभेदात्। तत्र हृदि प्राणः, गुदेऽपानः, नाभिमण्डले समानः, उदानः कण्ठदेशे, सर्वशरीरे व्यानः । स्थावरजङ्गमेषु सर्वत्र प्राणसंसर्गः समान एव वायोस्त्वगिन्द्रियेण प्रत्यक्षं भवति।

वायुतो रूपतन्मात्रं भवति, तत्राऽनुद्भूतरूपस्पर्शशब्दाः। वायुतेजसोर्मध्यमावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम्। रूपतन्मात्रात् तेजः तत्रोद्भूतशब्दस्पर्शरूपाणि भवन्ति। 'उष्णस्पर्शवत्त्वं' 'भास्वररूपवत्त्वं' 'रसशून्यत्वे सति उद्भूतरूपवत्त्वं'

---
१-ब्रह्मसूत्रम् २/२/२३
२-श्री स्वा. वेदान्तसार पृ. ४-५

वा तेजसो लक्षणम्। तच्चतुर्विधं भौमदिव्यौदर्याकरजभेदात्। तत्र पार्थिवमात्रेन्धनं तेजो भौमं वह्न्यादिकम्। जलादीन्धनं तेजो दिव्यं विद्युदादि। पार्थिव जलेन्धनं तेजो औदर्यं जाठराग्निः। निरिन्धनं तेज आकरजं सुवर्णादि। प्रभापि तेजः, तस्याः सङ्कोचविकासात्मकावस्थावत्त्वाद् द्रव्यत्वं प्रदीपाद्याश्रयकत्वाद् गुणत्वं च।

तेजसो रस तन्मात्रम् तत्राऽनुद्भूतशब्दस्पर्शरूपरसाः। तेजो जलयोर्मध्यमावस्थाविशिष्टं द्रव्यं रसतन्मात्रम्। रसतन्मात्राज्जलम्। तत्रोद्भूत शब्द-स्पर्श-रूप-रसाः सन्ति। गन्धरहितत्वे सत्युद्भूतरसवत्त्वं' 'शीतस्पर्श वत्त्वं' वा जलस्य लक्षणम्। पिण्डीकरणसेचनादि हेतुस्तत्।

जलाद्गन्धतन्मात्राम् तत्राऽनुद्भूतशब्दस्पर्शरूपगन्धाः सन्ति। जल पृथिव्योर्मध्यामावस्थाविशिष्टं द्रव्यं गन्धतन्मात्रम्। गन्धतन्मात्रात् पृथिवी। तत्रोद्भूतशब्दस्पर्शरूपरसगन्धाः भवन्ति। गन्धवत्त्वं 'शब्दादिपञ्चगुणवत्वं वा पृथिव्याः लक्षणम्।

## ४.१५ पञ्चीकरणप्रक्रिया

पृथक् स्थितानां भूतानां ब्रह्माण्डोत्पादनस्य सामर्थ्यं तथैव नासीत् येन प्रकारेण पृथक् स्थितानां मृतिकाजलादीनां कुड्यादिनिर्माणे सामर्थ्यं न भवति। परस्परं कृते सति तेषां संयोगे तैः कुड्यादि निर्माणं च क्रियते। तथैव पृथक्-पृथक् स्थितानि भूतानि भगवान् पञ्चीकरण प्रक्रियया संयोजयामास। तथा चोक्तम् श्रीविष्णुपुराणे-

**नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना।**
**नाशक्नुवन् प्रजाः स्त्रष्टुं समागम्य च कृत्स्नशः॥**
**समेत्यान्योन्य संयोगं परस्परसमाश्रयाः।**
**एकसंघातलक्ष्यास्तु सम्प्राप्यैक्यमशेषतः॥**
**महदादयो विशेषान्ता ह्यण्डमुत्पादयन्ति ते**[१]। इति॥

किञ्च तत्रैव

**एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा ततः।**
**चतुर्धा भिन्नेमेकैकमर्धमर्धं तथा स्थितम्॥**
**व्योम्नोऽर्द्धभागाश्चत्वारो वायुर्तेजः पयोभुवाम्।**
**अर्द्धानि यानि वायोस्तु व्योमतेजः पयोभुवाम्** '॥

इत्यादिना पञ्चीकरण प्रक्रिया स्पष्टतया अभिहित।

---

१-विष्णुपुराणम् १/२/५१-५३

स्वामिनारायण वेदान्तसारकारस्तु पञ्चीकरणस्य प्रकारं निम्नांकित प्रकारेण वर्णयति–

'परब्रह्म श्रीस्वामिनारायण परमात्मा भूतानि सृष्ट्वा एकैकमेवभूतं द्विधाकृत्य द्वयोर्भागयोः तदेकभागमवस्थाप्य भागान्तरं चतुर्धाकृत्य तांश्चतुर्भागान् भूतान्तरेषु चतुर्षु योजयति । एवं सर्वेषु भूतेषु क्रियमाणेष्वेकैकस्य भूतस्यार्धं स्वभागतोऽर्धान्तरं चतुर्धा भूतानां भागसमुच्चय इति भवति । तत्र स्वभागस्याधिकत्वात् परभागस्य अल्पीयस्त्वाच्च पृथिवी जलादि मुख्य व्यपदेशः[१]"। तथा चात्र सूत्रम् '**वैशेष्ट्यात्तु तद्वादस्तद्वादः**[२]"।

ननु छान्दोग्योपनिषदि तु त्रयाणामेव भूतानामुत्पत्तिः, तेषां त्रिवृत्करणञ्च श्रूयते। तथा च श्रुतिः "**तासां त्रिवृतं त्रिवृतमेकैकं करवाणीति**[३]"। भगवतः श्रीस्वामिनारायणस्य सत्यसंकल्परूपा दृश्यते । सूत्राकारोऽपि त्रिवृत्करणमेव समर्थयन् वक्ति–

'**त्र्यात्मकत्वात्तु भूयस्त्वादि**[४]"ति। तत्कथं पञ्चीकरण प्रक्रियाः वर्णनमिति चेत् तात्रोच्यते । त्रिवृत्करणमेव पञ्चीकरणप्रक्रियाया उपलक्षणम् । सप्तीकरणस्यापि । बुद्ध्यहङ्कारयोस्साकं तत्त्वानि सप्त भवन्ति ।

श्रीमद्भागवते महापुराणे तु पञ्चीकरणं भूतानां सप्तीकरणं महदादीनाञ्च निम्नांकितप्रकारेण समुपदिष्टम्–

**तानि चैकैकशः सृष्टुं समर्थानि भौतिकम् ।**
**संहृत्य दैवयोगेन हैममण्डमथासृजन् ।**
**सोऽशयिष्टाब्धिसलिलेऽण्डकोशो निरात्मकः ।**
**सार्द्धं वै वर्षसाहस्त्रंमन्ववात्सीत् तथेश्वरः ।**
**यस्य नाभेरभूत् पद्म सहस्त्रार्कोरुदीधितिः।**
**सर्वजीवनिकायैको यत्र स्वयमभूत् स्वराट् ।**
**सोऽनुप्रविष्टो भगवता, यः शेते सलिलाशये ।**
**लोकसंस्था यथा पूर्वं निर्ममे संस्थया स्वया ।।** इति

स्यान्नाम त्रिवृतकरणं पञ्चीकरणं वा सप्तीकरणं, किन्तु सृष्टावुत्पत्तौ एतेषां भवति संयोगः । पृथक् पृथक् स्थितानां भूतानां ब्रह्माण्डोत्पादने सामर्थ्यं नैव भवति। अतस्तेषां मिथः संयोगः सृष्टेरादावावश्यकः ।

---

१-श्री स्वा. वेदान्तसारः पृ.५
२-ब्रह्मसूत्रम् ३/ १/४
३-छांदोग्योपनिषत्
४-ब्रह्मसूत्रम् ३/१/२

## स्थूलशरीरनिरूपणम्

श्रीकृष्णवल्लभाचार्याः वर्णयन्ति यत् '**सर्वेषां स्थूल शरीरं पृथिवी जलतेजोवाय्वाकाशात्मक पञ्चभूतजं षट्कोषात्मकं च । स्नाय्वस्थिमज्जारोमलोहितमांसानि षट्कोशाः। तत्र पितृतः स्नाय्वस्थिमज्जानः। मातृतः रोमलोहितमांसानि** [१]'' इति ।

परानुकम्पया जीवः शरीरमिदमाप्नोति । मानवशरीराप्तिस्तु परानुकम्पया प्राप्यते समैः इति शास्त्राणां मुद्घोषः ।

**बुद्धीन्द्रियमनः प्राणान् जनानामसृजत् प्रभुः ।**
**मात्रार्थं च भवार्थं च ह्यात्मने कल्पनाय च** [२]॥

शास्त्राणां नियमानुपालनात् मोक्षाप्तिः सुलभा किन्तु स्थूलशरीरे सम्भवति समेषामात्मबुद्धिर्भवति फलतो ''**देहयोगाद् वा सोऽपि** [३]'' इति सूत्रानुसारं पौनःपुन्येन संसरति । माया बन्धने समर्था भवति तत्र देहोऽपि हेतुः । अत एव ''**देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वम्** [४]'' इति शास्त्राणामादेशः । स्वकृत कर्मानुसारं देवमनुष्यतिर्यक्स्थावरजंगमादिनानाशरीराण्याप्नोति जीवः । तदेव शरीरं स्थूलशरीरमित्यभिधीयते ।

## ४.१६ सूक्ष्मशरीरनिरूपणम्

सूक्ष्मं शरीरं वर्णयन् श्रीकृष्णवल्लभाचार्यो वक्ति '**सूक्ष्मं शरीरमेकोन विंशतितत्त्वात्मकमुक्तं शार्ङ्गपुरस्य चतुर्दशे वचनामृते । तद्यथा-पञ्च ज्ञानेन्द्रिय-पञ्चकर्मेन्द्रिय-पञ्चप्राण-चतुरन्तःकरणात्मकं सूक्ष्मं शरीरमिति** [५]।'

सांख्यास्तु- पञ्च ज्ञानेन्द्रियपञ्चकर्मेन्द्रियमनोबुद्ध्यहङ्कारपञ्चतन्मात्रात्मकाऽष्टादशतत्त्वात्मकं सूक्ष्मं शरीरमिति । कारण शरीरं तु मूलप्रकृतिः ' । इति ।

## ४.१७ शरीरस्य लक्षणम्

शरीरस्य स्वरूपनिरूपणं कुर्वता श्रीनिवासाचार्येण यतीन्द्रमत दीपिकायामभिहितम्-

'**शरीरं नाम चेतनं प्रत्याधेयत्व-विधेयत्व-शेषत्वनियमैरपृथक् सिद्धो द्रव्यविशेष इत्येकं लक्षणम् । नियमेन यदाधेयम्, नियमेन यद्विधेयम्, नियमेन**

---

१-श्री स्वा. वेदान्तसारः पृ. ५
२-भागवत् पुराणम् १०/८७/२
३-ब्रह्मसूत्रम् ३/२/५
४-भागवत् पुराणमाहात्म्य- ४/७९
५-श्री स्वा. वेदान्तसारः पृ. ५

**यच्छेषम्, तदिति लक्षणत्रयं योज्यम्। ईश्वरतज्ज्ञानव्यतिरिक्तद्रव्यमिति वा तटस्थ लक्षणम्। एतेन चेष्टाश्रयः शरीरम्, इन्द्रियाश्रयः शरीरं, भोगायतनं शरीरं, शिरः पाणिपादादिमयं शरीरमित्यादीनि परोक्तानि शरीरलक्षणानि निरस्तानि**[१]।' इति

श्रीस्वामिनारायणवेदान्तसारकारः श्रीकृष्णवल्लभाचार्य इदमेव लक्षणं शरीरस्य किञ्चिदन्यथां कृत्वा निम्नांकितप्रकारेण प्रस्तौति–

**'शरीरत्वं नाम-चेतनं प्रति सर्वात्मनाऽऽधेयत्व-विधेयत्वशेषत्व नियमैरपृथक् सिद्धत्वे सति द्रव्यविशेषत्वम्।' आधेयत्वं नाम आश्रितत्वम्। विधेयत्वं नाम नियाम्यत्वम्। शेषत्वं नाम अङ्गत्वम्। परार्थस्तु शेषः। परगताऽति-शयाधानेच्छयैकोपादेयत्वं यस्य स्वरूपं स शेष इति। अपृथक् सिद्धत्वं नाम यावत् सत्तमसम्बन्धानर्हत्वम्**[२]।' इति।

शरीरं हि शरीरिणः शेषभूतं भवति तस्य परार्थत्वात् शरीरिण फलायैव शरीरस्य सत्ता भवति।

## शरीरभेदाः

शरीरभेदनिरूपणं कुर्वता यतीन्द्रमतदीपिकाकारेणोक्तम् 'शरीरं द्विविधम् नित्यमनित्यमिति, तत्रनित्यं त्रिगुणद्रव्यकाल जीवशुभाश्रयादिकमीश्वरशरीरम्। नित्य सूरीणां गरुडभुजगादिरूपं च। अनित्यं द्विविधम् अकर्मकृतं कर्मकृतं चेति। प्रथममीश्वरस्य महदादिरूपम्। तथा अनन्तगरुडादीनां मुक्तानामीश्वरस्य इच्छागृहीतं तत्तद्रूपम्। कर्मकृतमपि द्विविधम् स्वसंकल्पसहकृतकर्मकृतम्। केवलकर्म कृतं चेति। पूर्वं महतां सौभरी प्रभृतीनां इतरदन्येषाम्। पुनः सामान्येन द्विविधम् स्थावरजङ्गमभेदात्। स्थावराःशिलावृक्षगुल्मादयः। जङ्गमाश्चतुर्धा देवमनुष्यतिर्यग्भेदात्। उद्भिजस्वेदजाण्डजजरायुजभेदा अपि विभाजकधर्माः। अयोनिज शरीराण्यपि सन्ति[३]।'

इदमेव शरीरभेदं श्रीस्वामी कृष्णवल्लभाचार्योऽपि स्वीकरोति। पिण्डब्रह्माण्डयोरैक्यात् ब्रह्माण्डस्यापि संक्षिप्तं निरूपणं क्रियतेऽत्र।

## ब्रह्माण्डनिरूपणम्

**श्रीस्वामिनारायण वेदान्तसारकारो निम्नांकित प्रकारेण ब्रह्माण्डं समासतो वर्णयति–**

'लोकस्त्रिविधो भवति-जीवलोक ईश्वरलोको ब्रह्मलोकश्चेति। तत्र

१-यतीन्द्रमतदीपिका चतुर्थोऽवतारः पृ. ९०
२-श्री स्वा. वेदान्तसारः पृ. ५
३- यतीन्द्रमतदीपिका चतुर्थोऽवतारः पृ. ९२




**भगवता श्री स्वामिनारायणेन ग.प्र. ४१,६३ तथा**
**खगोलभूगोलवचनामृतग्रथोक्तानुसारेण**
**चतुर्दश भूवनात्मकं ब्रह्माण्ड चित्रम्**

जीवलोका अष्टाऽऽवरणान्तर्गत ब्रह्माण्डान्तर्वर्तिनश्चतुर्दशसंख्याका: सत्यादिपातालान्ता: । तत्र सर्वे चेतना जीवपदवाच्या भवन्तीति । ब्रह्माण्डाद् बहिर्विराडादीनां महाविष्णुशयितहिरण्यमयकोशाख्य मायाण्डपर्यन्तानां प्रकृति पुरुष कार्यान्तर्गता लोका ईश्वरलोका: भवन्ति । तत्र सर्वेऽपि चेतना ईश्वरपदवाच्या भवन्ति। एतत् पर्यन्तं प्रकृतिकार्य मायालोक इति । तदुपरि दिव्यं ब्रह्मलोक: "[1]। इति

## ४.१८ प्रकृतेर्जगतकारणत्वशङ्का:

सांख्यमतावलम्बिन: प्रकृतेरेव जगत्कारणत्वं प्रतिपादयन्त: प्रतिपादितवन्तो यत् यस्मात् कारणात् जगदिदं त्रिगुणात्मकं वर्तते तस्मादेव कारणात् प्रकृतेरेव जगत् कारणत्वमनुमीयते यत: प्रकृति जडा वर्तते । कारणगुणा: कार्यगुणानारभन्ते इति नियमानुसारेण कारणे विद्यमान एव गुणा: कार्येष्वायान्ति।

यदि ब्रह्मैव जगत:कारणं भवेत्तर्हि तस्मात् निर्गुणात् ब्रह्मण उदभूतमपि जगद् त्रिगुणात्मकं न स्यात् । अतो जगत: कारणं ब्रह्म नो भवितुमर्हति ।

किञ्च "**सदेव सोम्येदमग्र आसीत्** [2]" इत्यादावपि सत् शब्दवाच्यं प्रकृतिरेव स्यात्, अनुमानात्मक शब्द प्रयोगात्, । अनुमीयते चापि प्रकृति: । अत एव प्रकृतिकारणवाद एवं स्वीकरणीयम् ।

## ४.१९ प्रकृतेर्जगत् कारणत्वनिरास:

अत्रोच्यते प्रकृति जगत्कारणं भवितुं नार्हति । सर्वासु पुरोवादिनिषु श्रुतिषु, ईक्षणपूर्वकमेव सृष्टे: श्रवणात् । "तदैक्षत् बहुस्यां प्रजायेय" इत्यादिका: श्रुतय: सत्यसंकल्पपूर्विकामेव सृष्टिमभिदधति । सत्यसंकल्पश्च कस्यचन चेतनस्यैव धर्मो भवितुमर्हति । सांख्याभिमता प्रकृति: जडा वर्तते । अत एव तस्या: धर्मो नहि भवितुमर्हति सत्यसंकल्प: । सत्य संकल्पेनैव हेतुना जगत:कारणम् कश्चन संकल्प संपन्न: चेतन एव भवितुमर्हति ।

सत: चेतन: परमात्मैव । तस्यैव सर्वज्ञत्वादिकं प्रतिपादयन्ति "**य: सर्वज्ञ: सर्ववित्** [3]" "परास्य शक्तिर्विविधैव श्रूयते " इत्यादिका: श्रुतय: । अत एव सर्वशक्तिसंपन्नस्य तस्य परमात्मन एव जगत् कारणत्वं स्वीकरणीयम्। नहि घटत अचेतनाया: प्रकृते: जगत् कारणत्वम् ।

---

१-श्री स्वा. वेदान्तसार: पृ. ६
२- छांदोग्योपनिषत् ६/२/१
३-मुण्डकोपनिषत् १/१/९

किञ्च यदि प्रकृतिरेव जडा जगतः कारणं स्यात्, तर्हि सा चेतनानां कारणं नहि भवितुमर्हति, तस्या अचेतनत्वात्। कार्यकारणयोः समानगुणसम्पन्नत्वस्य अनन्यत्वस्य च नियमात्। अचेतनादचेतनस्योत्पत्तिर्भवितुमर्हति, न तु चेतनस्य।

किञ्च **'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रत्यभि संविशन्ति,**[१]' इत्यादिका अपि श्रुतयः परस्मादेव ब्रह्मण जगत उत्पत्तिं प्रतिपादियन्ति। एतस्मादपि कारणात् ब्रह्मणो जगत्कारणत्वं सिद्धयति।

ब्रह्मणो जगत्कारणत्वं प्रतिपादयता प्रकृतेश्च जगत्कारणत्वमपाकुर्वता महर्षिणा बादरायणेनापि सूत्रितं – **'ईक्षतेर्नाशब्दम्**[२]' इति।

अयमर्थो यत् नास्ति शब्दः प्रमाणम् यस्मिंस्तत्, अशब्दम्, प्रधानमिति यावत्। ततः जगतः कारणं नहि भवितुमर्हति।

कस्मादिति चेत् – ईक्षतेः। ईक्षणो हि संकल्पविशेषः, तच्च जडस्यासंभवम्। अत एव प्रकृतेः नास्ति जगत् कारणत्वम्।

अत्र तु मया संक्षेपेणेदं प्रतिपादितम्। परब्रह्मप्रकरणे विस्तरेणैतत् प्रतिपादयिष्ये।

## ४.२० प्रकृतेः परमात्मशरीरत्वसमर्थनम्

येयं प्रकृतिः विस्तरेण मयास्मिन्नध्याये निरूपिता, सेयं परमात्मनः शरीरभूता वर्तते। प्रकृतेः परमात्म शरीरत्वं हि, बृहदारण्यकोपनिषद्ः तृतीयेऽध्यायेऽन्तर्यामि ब्राह्मणे विस्तरेण, महर्षि याज्ञवल्क्य समर्तिशत्। **'यस्य क्षरः शरीरम्, यः पृथिव्यां संचरन् पृथिव्यन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरम्, स त आत्मान्तरर्याम्यमृतः'** इत्यादिभिः श्रुतिभिः। अनेनैव प्रकारेण सुबालोपनिषद्यपि **'यस्याक्षरं शरीरम्,**[३]' इत्यादिनास्य, **'स दिव्यो देव एको नारायणः'** इत्यादिना प्रकृतेः प्राकृतानां चात्मनोऽपि परमात्मशरीरत्वं समर्थितमास्ते।

किञ्च **'जगत् सर्वं शरीरं ते**[४]' **'तत्सर्वं वै हरेस्तनुः**[५]' **'तानि सर्वाणि तद् वपुः**[६]' इत्यादिकानि स्मार्तान्यपिवाक्यानि परमात्मानः जगत् शरीरत्वं प्रतिपादयन्ति।

---

१- तैतिरीयोपनिषत् भृगुवल्ली १/१
२- ब्रह्मसूत्रम् १/१/५
३- सुबालोपनिषत् ७/१
४- जनमङ्गलस्तोत्रभाष्य द्वितीयमंत्र उद्धृतम्
५-जनमङ्गलस्तोत्रभाष्य द्वितीयमंत्र उद्धृतम्
६-जनमङ्गलस्तोत्रभाष्य द्वितीयमंत्र उद्धृतम्

तदिदं सम्पूर्णं मायायाः कार्यभूतं जगत् परमात्मनः शरीरभूतं वर्तत इति **"य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति** [१]"। , **'यस्य प्राणः शरीरम्** [२]" **'यस्य पृथिवी शरीरम्** [३]" इत्यादिकाः श्रुतयः **'जगत् सर्वं शरीरं ते** [४]", **'तत्सर्वं वै हरेस्तनुः** [५]" **'तानि सर्वाणि तद्वपुः** [६]" इत्यादिकाः स्मृतयश्च् सन्तीति परब्रह्म तत्त्व निरूपणावसरे निपुणं प्रतिपादयिष्यामः, इत्यत्रत्वेतेनैवालम् ।

## ४.२१ कालनिरूपणम्

कालः मायायाः कार्यं नास्ति अथापि माया लोके समुपलभ्यते

सर्वाणि मायाकार्याणि कालान्तर्गतान्येव भवन्ति। अत एवास्मिन्नेवाध्याये तस्य निरूपणं साम्प्रतम् । अयं सत्त्वरजस्तमरहितो जडद्रव्यविशेषः। नित्यो विभुश्च । विभुत्वं नामव्यापकत्वं, सर्वत्रप्रतीतिविषयत्वमिति यावत् । स च भूतभविष्यद्वर्तमान भेदेन त्रिधोपदिश्यते । काल एव निमेष-क्षण-काष्ठा-कला-मुहूर्त-दिवस-पक्ष-मासर्त्वयन-संवत्सर-युगादिव्यवहार हेतुः । तत्र निमेषो नाम -नेत्रपुट्योर्द्रागेव संयोजं वियोजनं त्रिकाल इति यावत् निमेषाः-क्षण । त्रिक्षणाः, पञ्चदशनिमेषा वा काष्ठा । त्रिशंत् काष्ठा-कला । त्रिशंत् कलाः- मुहूर्तम्। त्रिशंन्मुहूर्तानि - दिवसः । पञ्चदश दिवसाः पक्षः । द्वौ पक्षौ मासः, द्वौ मासावृतुः ऋतवस्त्रयोऽयनम् । अयने द्वे संवत्सरः । सत्ययुगस्य वर्षाणि-अष्टाविंशतिसहस्राधिकसप्तदशलक्षाणि । त्रेतायुगस्य वर्षाणि । षण्णवतिसहस्राधिकद्वादशलक्षाणि । द्वापर युगस्यवर्षाणिचतुः षष्ठिसहस्रा धिकाऽष्टलक्षाणि । कलियुगस्य वर्षाणि द्वात्रिंशत्सहस्राधिकचतुर्लक्षाणि । मिलित्वा-चतुर्युगवर्षाणि विंशतिसहस्राधिकत्रिचत्वारिशंल्लक्षाणि। तादृशचतुर्युगानामेकसप्ततिः मन्वतरं भवति । एकस्मिन् मन्वन्तरे द्वादश त्रिलोकिराज्यं कृत्वा विनश्यति-इत्येवं प्रतिमन्वन्तरं, ब्रह्मणो लवनिमेषादिकं भूत्वा-भूत्वा प्रलीयते वस्तुजातमकस्मादिति स नित्यलय [७]" इति

अथर्ववेद-"**शतं तेऽयुतं हायनान् द्वे युगे त्रिणि चत्वारि कृण्मः** [८]"।

---

१-शतपथ ब्राह्मणम् १४/५/३
२-बृहदारण्योकोपनिषत् ३/७/१६
३-सुबालोपनिषत् ७/१
४- जनमङ्गलस्तोत्रभाष्य द्वितीयमंत्र उद्धृतम्
५- जनमङ्गलस्तोत्रभाष्य द्वितीयमंत्र उद्धृतम्
६- जनमङ्गलस्तोत्रभाष्य द्वितीयमंत्र उद्धृतम्
७-श्री स्वा. वेदान्तसारः पृ. ९
८-अर्थववेद

**सूर्यसिद्धान्ते** –मध्यमाधिकारे

**युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते ।**
**कृताब्दसंख्या तस्यांते सन्धिः प्रोक्तो जलोद्भवः ।**
**ससन्धयस्ते मनवः कल्पज्ञेयश्चतुर्दश ।**
**कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशस्मृतः।**
**इत्थंयुगसहस्त्रेण मूलसंहारकारकः ।**
**कल्पो ग्राह्ममहः प्रोक्तंशर्वरी तस्यतावती** [१]।

इति निर्णयात् –चतुर्दशमन्वन्तरकालः एककल्प ब्रह्मणः एकदिवसः इत्युच्यते। तस्मिन्नेह कल्पे चतुर्दशनमन्वन्तराणां पञ्चदशसन्धयो भवति। तत्र चतुर्दशनमन्वन्तराणि मिलित्वा वर्षाणि चत्वारिंशदर्बुदैकौनत्रिशंत्कोटि चत्वारि लक्षाऽशितिसहस्त्राणि भवन्ति – अत्र च प्रत्येकसन्धेः सप्तदशलक्षाष्टाविंशति सहस्त्रवर्षाणि निर्धारितानि। तदनुसारेण पञ्चदशसन्धीनां मिलित्वा वर्षाणि – द्विकोट्येकोनषष्टिलक्षविंशतिसहस्त्राणि भवन्ति।

एवं च सन्धीनां मन्वन्तराणां च मिलित्वा वर्षाणिचत्वारिंशदर्बुद द्वात्रिंशत्कोटि संख्याकानि भवन्ति। तावन्मात्रोऽयं कालः कल्पः, इत्युच्यते। कल्पान्ते निशामुखे ब्रह्मणः स्वापारम्भे महर्जनतप–सत्यलोकान् विहाय स्वर्गादिपातालान्तानां दशलोकानां प्रलयो भवति। पुनश्च द्वितीयदिवसारम्भे समुत्पद्यन्ते। सोऽयं नैमित्तिकः प्रलयो द्वितीय इति।

यदि च मन्वन्ताराणां सन्धीनां च वर्षाणां न पृथग्गणना, तदा तु कल्पस्य वर्षाणां चतुर्दशभागा एव विधेयास्तेन प्रत्येकमन्वन्तरस्य– त्रिंशत्कोटिपञ्चशीति लक्षैक सप्ततिसहस्त्रचतुः शताष्टाविंशति वर्षाणि, तदुपरिषण्मासाः पञ्चविंशतिदिवसाः द्विचत्वारिंशद्घटिकाएक पञ्चाशत् पलानि पञ्चविशंतिनिमेषा द्विचत्वारिंशल्लवा, द्वादशलवानां चर्तुर्दशो भागश्चेति समयो निर्धारितोऽस्ति इति।

ब्रह्मणस्तादृशत्रिशंत्यधिक चतुष्षष्ठि दिवसानामेकं वर्षम्, तादृशशतवर्षाणि ब्रह्मणः आयुषः समय :। ब्रह्मणः शतवर्षाणां समाप्तौ सत्यामष्टावरण सहित ब्रह्माण्डप्रलयो भवति। सोऽयं प्राकृतिक प्रलय इत्युच्यते अत्र प्रलये विराडा दीश्वरलोकानां संहारो भवति सोऽयं महाविष्णोः एकदिवसात्मकः कालः। एतादृशदिवसानुसारेणमासवर्षादिक्रमेण महाविष्णो : शतवर्षपर्यन्तमायु :। तस्य समाप्तौ सत्यां प्रकृतिर्महामाया हिरण्यकोशात्मक सर्वं कार्यं संहृत्य स्वयमेकाकिनी परमेश्वर शक्तिरूपाऽक्षरधामनि विलीनैव भवति। महाविष्णुरपि महामुक्तरूपो

१-सुर्यसिद्धान्तः मध्यमाधिकारः १८-२०

ब्रह्मधामनि लीयते। इत्येवं यावन्तः प्रकृत्युदरन्तःस्थिता, अगणिता महाविष्णवो मुक्ततां यान्ति। स चायमात्यन्तिक प्रलय इत्येतत् सर्वमर्वाचीनं भवति।

अखण्डः कालो नित्यः। निमेषादिः प्रलायान्तकोऽनित्यः। निखिलजगदुत्पत्तिलयलोकस्य परमेश्वरस्यायं कालो लीलोपकरणमिति। ब्रह्मधामातिरिक्ता हिरण्मयकोशान्तर्गता जीवेश्वर सृष्टिःतस्यां लीलाविभूतौ परमेश्वरः कालमङ्गीकृत्यैव कार्यं करोति। ब्रह्मधामनि नित्यविभूतौ कालस्य न प्रयोजनम्। **न कालस्तत्रवै प्रभुः**। इत्यभियुक्तोक्तेः। इत्थं कालो निरूपितः।

श्रीभाष्यकारमतानुसारेण महाविष्णोः लयो न भवति, किन्तु श्री स्वामिनारायणदर्शनानुसारेण आत्यन्तिके प्रलये महाविष्णोरपि लयो भवति। श्री भाष्यकारमतानुसारेण महाविष्णुरेव परब्रह्म, परन्तु, श्री स्वामिनारायण दर्शनानुसारेण अक्षरपुरुषोत्तम स्वयं परब्रह्म। स च महाविष्णोर्भिन्नः।

## ४.२२ उपसंहार

श्रीस्वामिनारायणशदर्शने यद्धि तत्त्वपञ्चकं स्वीक्रियते, तत्र मायैवाचेतनं तद् व्यतिरिक्तानि चत्वारि तत्त्वानि चेतनान्येवेति नास्ति तिरोहितं विपश्चिदश्चिमेभ्यः। लोकेऽस्माभिः चेतनैः यानि कान्यपि वस्तून्युपभुज्यन्ते तानि सर्वाणि मायाया एव कार्यभूतानि। अनया माययैव ग्रस्ताः समे बद्धाः जीवाः परमात्मपराङ्मुखाः सन्ति। इयं हि माया दर्शनेऽस्मिन् परमात्मनः शक्तिस्वरूपा स्वीक्रियते। भगवता स्वामिनारायणेनापि शिक्षापत्र्यामभिधीयते- मायेयं त्रिगुणात्मिका, तमोरूपा, भागवतः श्रीकृष्णस्य शक्तिस्वरूपा, जीवानां देहादिषु देहसम्बन्धिषु चाहंभावस्य जनयित्री वर्तते। तथा च श्लोकः-

**त्रिगुणात्मा तमः कृष्णशक्तिर्देहतदीययोः।**
**जीवस्य चाहंममता हेतुर्मायावगम्यताम्** [१]॥

नूनं मायेयं त्रिगुणात्मिका वर्तते। ते च गुणाः सत्त्वरजस्तमोरूपाः सन्ति। तैर्गुणैरेवेयं जीवान्, सुखितान् दुःखितान् मोहान्वितांश्च करोति। यद्यपि प्रकृतेर्गुणानां नहि भवति साक्षात्कार अथापि तेषामेव गुणानां कार्याणि सन्ति सुखदुःखमोहाश्च।

गुणानामेषां स्वभाववर्णनावसरे सांख्याकारिकाकारेण ईश्वरकृष्णेनाप्यभिहितम्-

**सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं च रजः।**
**गुरुवरणकमेवतमः प्रदीपवच्चार्थतो वृत्तिः** [२]॥

१-शिक्षापत्री - १०६ २-सांख्यकारिका - १३

यदा सत्त्वगुणो भवत्युद्रिक्तः तदा शरीरं लघु भवति ज्ञानस्य प्रकाश एधते, आनुकूल्यस्य प्रतीतिर्जायते, किन्तु यदा रजोगुणस्योद्रेको भवति तदा तु, कार्येषु प्रवृत्तिर्भवति उत्साहश्च वर्धते। यदा तु तमोगुणो भवत्युद्रिक्तः तदा शरीरे गुरुताऽनुभूयते, निद्रादिकं च जायते। ज्ञानञ्चावृत्तं भवति। अत एवोक्तमपि-

**प्रीत्यप्रीतिविषादात्मकाः प्रकाश प्रवृत्तिनियमार्थाः।**
**अन्यौऽन्योऽभिभवाश्रयजननमिथुनवृत्तयश्च गुणा** [१]॥

अस्यैवार्थस्य प्रतिपादनं देवीभागवतस्य तृतीये स्कन्धेऽपि कृतं वर्तते निम्नांकितैः श्लोकैः-

**'अन्योऽन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः।**
**रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः॥**
**तमसश्चापि मिथुनं सत्त्वरजसीत्युभे।**
**उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते॥**
**नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते** [२]।

यद्यपि सांख्यशास्त्रे त्रयो गुणा एव प्रकृतिरित्यभिधीयन्ते किन्तु स्वामिनारायण दर्शने तेषां समेषां गुणानामाधाररूपेण स्वीक्रियते प्रकृतिः। अस्य दर्शनस्यास्य मान्यतायां निम्नांकितानि गीतावाक्यान्येव प्रमाणभूतानि सन्ति। तथाहि "**प्रकृतिजैर्गुणैः** [३]" इति वाक्येन गुणानां प्रकृतिजन्यत्वं प्रतीयते। '**प्रकृतिजान् गुणान्** [४]' इत्यपि वाक्यं गुणानां प्रकृतिजन्यत्वमभिधत्ते।

मायेयमजा वर्तते इति '**अजामेका लोहितशुक्लकृष्णाम्** [५]' इति श्वेताश्वतरंश्रुत्या ज्ञायते। सेयं माया एका अजा वर्तते इति '**अजा ह्येका भोक्तृभोग्यार्थयुक्ता** [६]'। इति श्रुत्या भवति प्रतिपादितम्। भोक्तृभोग्यार्थयुक्ता इति पदेन तस्या भोग्यत्वं परार्थत्वं च श्रुतिरभिधत्ते।

**हरिवाक्यसुधासिन्धौ** निम्नांकिते वाक्ये भगवान् स्वयमेव प्रकृतिं भगवतः शक्तिरूपां, नित्यां चिज्जडात्मिकां, अव्ययस्वरूपां, निर्विशेषां चाभिधत्ते। तथा च श्लोकः-

**नित्या च भगवच्छक्तिस्त्रिगुणा चिज्जडात्मिका।**
**निर्विशेषा जीवमहत्तत्वादिक्षेत्रमव्यया** [७]॥

---

१-सांख्यकारिका- १२
२-देवीभागवत पुराणम् ३/८/१०
३-भगवद्गीता ३/५
४-भगवद्गीता १३/२१
५-श्वेताश्वतरोपनिषत् ४/५
६-श्वेताश्वतरोपनिषत् १/९
७-हरिवाक्यसुधासिन्धुः १२/८

यद्यपीयं माया नित्या वर्तते अथापि तस्याः निरन्तरं परिणामो भवतीति समेषां सम्मतम्। इयं निर्विशेषा वर्तते। जयाख्य संहितायामियमव्यक्तत्वेनाभिहिता वर्तते- '**अनादिमजमव्यक्तं गुणत्रयमयं द्विज**'[१]। इति वाक्येन परमात्मनाऽधिष्ठितेयं सचराचरं जगज्जनयतीति। '**मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्**'[२]।

इयं माया दुःखमया विद्यते। अस्याः संतरणे त एव क्षमाः भवन्ति ये भगवत् प्रपन्नाः भवन्ति। इति प्राह भगवान् निम्नांकितेन श्लोकेन।

**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते**[३]॥

श्रीमद् भागवते तु मैत्रेयमहर्षिः विदुरं प्रति वक्ति यन्मायेयं भगवतः सदसदात्मिका शक्तिर्वर्तते। तथाहि-

'**सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका।**
**माया नाम महाभाग यदिदं निर्ममे जगत्**[४]॥ इति

श्रीस्वामिनारायण दर्शनानुसारेण मूलप्रकृतिः अनन्तकोटि ब्रह्माण्डानामुपादानकारणं वर्तते। किन्तु प्रधानप्रकृतिः कस्यचनैकस्य ब्रह्माण्डस्योपादानकारणं भवति। मूलप्रकृतेरियं प्रधान प्रकृति एवावयवभूता वर्तते, किन्तु मूलप्रकृति प्रधानप्रकृतेरवयवी वर्तते।

मुक्तपुरुषस्य सहयोगेनैव मूलप्रकृतिः विषमामवस्थां धत्ते, तदैवानन्तकोटिब्रह्माण्डानामुत्पत्तेरारम्भो भवति।

यद्यपि श्रीमद्यामुनाचार्यः ब्रह्माण्डस्य दशावरणान्याह '**दशावरणानि यानि च**'[५] इति वाक्यांशेन, किन्तु श्रीस्वामिनारायण दर्शने ब्रह्माण्डस्याष्टावेवावरणानि स्वीक्रियन्ते। तान्येव आवरणानि-

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्न प्रकृतिरष्टधा**[६]॥

यतीन्द्रमतदीपिकाकारोपि दशैवावरणानि ब्रह्माण्डस्य स्वीकरोति। अभिहितमपि तेन- '**तदण्डं दशोत्तरावरणावृतम्**[७]'। इति।

---

१-जयाख्यसंहिता ३/२
२-भगवद्गीता ९/१०
३- भगवद्गीता ७/१४
४- श्रीमद्भागवतम् ३/५/२५
५-स्तोत्ररत्नम्
६-भगवद्गीता ७/४
७- यतीन्द्रमतदीपिका पृ-९८

यावत् कालपर्यन्तं मायायाः सङ्गो भवति तावत् कालं भवति संसारः। मायायाः संबन्धे समाप्ते जाते सति संसारस्य हानो भवति।

प्रकृतितत्त्वस्य निरूपणस्योपसंहारे पण्डितवरेण्यः श्रीकृष्णवल्लभाचार्योऽभिधत्ते यत्-

**'तदेतत् सुप्रतिष्ठितं सर्वसंस्थानमण्डं 'विराट्' पुरुषस्योदरदशाङ्गुलमानं संस्थितमिति । तत् पञ्चाशत्कोटियोजनायामं शास्त्रैर्गीयते तत्परिवेष्ट्य प्रकृतिलयानां लोकात्मकान्यष्टावरणानि संस्थितानि। तदुपरि विराट् पुरुषस्य लोकः। तदुपरिशिवलिङ्गज्योति लोकः। तदुपरि विष्णुलोकः । तदुपरि महाविष्णु लोकः । महाविष्णुर्मायाया उदरे सुप्तोऽस्ति । स हिरण्मयकोश इति कथ्यते । तावत्पर्यन्तं मायाचेष्टितं बोध्यम्[१]'।**

१-स्वा. वेदान्तसारः पृ. ९